श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री चक्रपाण्यष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री चक्रपाण्यष्टकम् ॥

सतोयतोयदालिनीलदिव्यविग्रहोपरि
स्फुरद्धिरण्यकान्तिजालशोभिपीतवाससे।
किरीटरत्नरोचिषा विनिर्जितोष्णरश्मये
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ 1 ॥

ललामशोभितत्तदङ्गसौभगात्ममूर्तये
ललाटगोर्ध्वपुण्ड्रकान्तिधूतपातकालये।
प्रफुल्लरत्नवारिरुड्ढदायतात्मचक्षुषे
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ 2 ॥

अनर्घरत्नदीप्तपुञ्जहैमकुण्डलित्विषा
धगद्धगायमाननैजगण्डयुग्मशोभिने।
अमन्दशीतमन्दहासनिर्जितामृतांशवे
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ 3 ॥

प्रशस्तकम्बुकन्धरप्रलम्बिकौस्तुभोल्लसद् -
बृहद्विशालवक्षसि स्थितेन्दिराविभूतये।
भुजङ्गराजभोगदीर्घभूषणाढ्यबाहवे
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ 4 ॥

समस्तजीवसन्तताण्डकोटिपूर्णकुक्षये
सदन्तरङ्गरत्नपीठवासिनेऽमलात्मने।
खगाधिराजवाहनस्थिताय शेषशायिने
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ 5 ॥

अशेषभूतभौतिकादिविश्वसृष्टिशक्तिमद् -
विधातृजन्मभूमिभूतनाभिपङ्कजश्रिये।
समस्तवेदसन्नुतप्रभावयुङ्गिजाङ्घ्रये
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ **6** ॥

दशाननाद्यनेकदुष्टनिग्रहार्थमादराद्
गृहीतरामकृष्णपूर्वदिव्यमूर्तिकोटये।
गजेन्द्रपूर्वनैजभक्तपालनैकदृष्टये
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ **7** ॥

अमायिकस्वरूपभूतपारमार्थिकाश्रया -
दखण्डसच्चिदात्मकस्वरूपमात्रशोभिने।
अथापि तत्तदुत्सवाय तत्तदात्मकाय ते
नतिर्ममास्तु सन्ततं हृदिस्थचक्रपाणये॥ **8** ॥

चक्रपाण्यष्टकस्तोत्रमिदं भक्त्यैव यः पठेत्।
विपच्चक्रान्न तस्यास्ति भयलेशोऽपि सर्वदा॥ **9** ॥

॥ इति श्री चक्रपाण्यष्टकं समाप्तम्॥